| गणस्यार्थकारित्वादिभेदाः | २१० | २९ |
| रूपधर्मयोर्हानाहानाभ्यां भेदाः | २११ | १० |

| विषयाः | पृ. | पं. |
|---|---|---|
| धर्ममर्यादयोर्हानाहानाभ्यां भेदाः | २११ | १३ |
| श्रमणोपासकानां मात्रादिसमतावर्णनम् | २११ | २० |
| अन्धकारभेदाः | २१२ | ४ |
| दुःखशय्यावर्णनम् | २१२ | ११ |
| आत्मंभरिपरम्भरिवर्णनम् | २१२ | २७ |
| दुर्गतसुगतवर्णनम् | २१३ | ४ |
| दुर्गतसुव्रतनिरूपणम् | २१३ | ७ |
| दुर्गतदुर्गतिगामिकथनम् | २१३ | १० |
| परिज्ञातकर्मसंज्ञादिभङ्गाः | २१३ | १३ |
| धूकेन द्वाभ्यां हानिवृद्धिवर्णनम् | २१३ | २६ |
| शय्यादिविषये चतुर्विधाः प्रतिमाः | २१४ | ५ |
| जीवस्पृष्टशरीरप्रकाशनम् | २१४ | २२ |
| कार्मणमिश्रशरीरप्रकटनम् | २१४ | २६ |
| लोकव्यासवस्तुवर्णनम् | २१४ | २७ |
| सुखावेद्यशरीरवर्णनम् | २१५ | ५ |
| जीवपुद्गलस्वभावप्रकाशनम् | २१५ | १२ |
| दृष्टान्तभेदाः | २१५ | १९ |
| आहरणदृष्टान्तः | २१५ | १८ |
| तद्देशदृष्टान्तः | २१५ | २९ |
| तद्दोषदृष्टान्तः | २१६ | १ |
| उपन्यासदृष्टान्तः | २१६ | ९ |
| लोकाश्रयेणान्धकारोद्योतकारिवर्णनम् | २१६ | १८ |
| भोगसुखाश्रयेण प्रसर्पकवर्णनम् | २१६ | २६ |
| नारकादीनामाहारप्ररूपणम् | २१७ | ५ |
| चिकित्सकानां चतुर्भङ्गाः | २१७ | १७ |
| अन्तर्बहिर्भ्यां शल्यदुष्टत्वतश्च पुरुषभेदाः | २१८ | २ |
| प्रव्रज्याया इहलोकप्रतिबद्धादिभेदाः | २१८ | ११ |
| अवपातप्रव्रज्यादिभेदाः | २१८ | २१ |
| वपनवतीप्रव्रज्यादिभेदाः | २१९ | २ |
| उपसर्गप्रभेदाः | २१९ | १५ |
| औत्पत्तिक्यादिबुद्धिभेदाः | २१९ | २१ |
| नारकत्वादिसाधककर्मप्ररूपणम् | २२० | ४ |
| स्थूलमहाव्रतपञ्चकप्रकाशनम् | २२० | २० |
| व्रतस्याणुत्वमहत्त्वप्रयोजकाभिधानम् | २२१ | ६ |
| दुर्गतिसुगतिसाधनपञ्चकम् | २२१ | १५ |
| नारकादीनां शरीरवर्णादिप्रकाशनम् | २२१ | २३ |
| प्रथमपश्चिमजिनानां कृच्छ्रवृत्तिकथनम् | २२२ | २ |
| श्रमणानां सदाकर्तव्यानां कीर्तनम् | २२२ | ११ |
| विसाम्भोगिकं कुर्वतो निर्ग्रन्थस्याज्ञाबाह्यत्वाभावाभावप्रकाशनम् | २२३ | १० |
| पञ्चविग्रहस्थानप्रस्फोटनम् | २२३ | २४ |
| प्रतिघातपञ्चकस्वरूपाणि | २२४ | ११ |
| आक्रोशाद्यकर्त्तव्यताकथनम् | २२४ | २३ |
| केवलिनोऽनुत्तरज्ञानादिप्रकाशनम् | २२५ | ५ |
| निर्ग्रन्थानां निर्ग्रन्थीनामकल्प्यवर्णनम् | २२५ | १० |
| प्रावृषि कल्प्याकल्प्यप्रकाशनम् | २२५ | १८ |
| प्रथमप्रावृट्शब्दार्थः | २२५ | २१ |
| वर्षावासस्य जघन्योत्कृष्टप्रमाणकथनम् | २२५ | २९ |
| पर्युषणाकल्पकथनम् | २२६ | १ |
| ग्रामान्तरगमनं ज्ञानाद्यर्थं कल्पत इत्याख्यानम् | २२६ | ४ |
| कर्मद्वारतन्निरोधद्वारकथनम् | २२६ | १२ |
| परिज्ञाभेदाः | २२६ | १७ |
| व्यवहारभेदाः | २२६ | २१ |
| आगमश्रुतयोर्भेदकथनम् | २२६ | २२ |
| उपघातभेदाः | २२७ | ३ |
| अवर्णवादभेदाः | २२७ | १२ |
| वर्णवादकथनम् | २२७ | २६ |
| अतिशये वर्तमानस्याचार्यस्य धर्मानतिक्रमणकथनम् | २२८ | ४ |
| प्रस्फोटने सप्तभङ्गप्रदर्शनम् | २२८ | १३ |
| आचार्यस्य गणान्निर्गमनकारणवर्णनम् | २२९ | ८ |
| पञ्चास्तिकायानां द्रव्यादिपञ्चभेदाः | २२९ | २४ |
| निर्ग्रन्थभेदाः | २३० | ६ |
| जाङ्गमिकादिवस्त्रभेदाः | २३० | २३ |
| और्णिकादिरजोहरणभेदाः | २३० | २८ |
| निश्रास्थानवर्णनम् | २३१ | २ |
| शौचभेदाः | २३१ | ८ |
| ह्रीसत्त्वादिपुरुषभेदाः | २३१ | १७ |
| भिक्षाकभेदाः | २३१ | २३ |
| वनीपकभेदाः | २३१ | २५ |
| नक्षत्रसंवत्सरभेदाः | २३१ | ३० |
| सप्रमाणं नक्षत्रसंवत्सरभेदवर्णनम् | २३२ | १ |
| जीवस्य शरीरनिर्गमप्रकारकथनम् | २३२ | २० |
| ज्ञानावरणक्षपणोपायनिरूपणम् | २३२ | २५ |
| गणधारकाणां षट्स्थानम् | २३३ | ५ |
| जीवानां दुर्लभ्यपर्यायप्रकटनम् | २३३ | १७ |

| विषयाः | पृ. | पं. |
|---|---|---|
| सम्मूर्च्छनजादिभेदाः | २३३ | २९ |
| ऋद्धिमतां भेदाः | २३४ | १ |
| संहननभेदाऽऽदर्शनम् | २३४ | ४ |
| संस्थानभेदवर्णनम् | २३४ | ११ |
| जीवाश्रयेण शुभाशुभानुबन्धप्रकाशनम् | २३४ | २२ |
| जीवानां गत्यादिदिग्वर्णनम् | २३५ | २ |
| व्युत्क्रान्त्यादयोऽपि तथेति वर्णनम् | २३५ | ६ |
| संयतानामाहारग्रहणकारणकथनम् | २३५ | २७ |
| प्रमादप्रत्युपेक्षाऽभिधानम् | २३५ | २७ |
| आरभट्यादीनां स्वरूपवर्णनम् | २३६ | ७ |
| अप्रमादप्रत्युपेक्षाऽऽख्यानम् | २३६ | १५ |
| बाह्यतपसो भेदाः | २३६ | २५ |
| अनशनादिस्वरूपाणि | २३६ | २८ |
| आभ्यन्तरतपोभेदाः | २३७ | ५ |
| षोढा भिक्षाचर्यावर्णनम् | २३७ | ११ |
| पेटार्धपेटादीनां स्वरूपाणि | २३७ | १५ |
| अकल्प्यवचनप्रकाशनम् | २३७ | २५ |
| प्रायश्चित्तस्य प्रकाराः | २३८ | २ |
| प्राणातिपातविषयेऽन्वयनम् | २३८ | ४ |
| मृषावादे तत्समन्वयनम् | २३८ | ११ |
| अदत्तादाने सङ्गमनम् | २३८ | १६ |
| अविरतिवादे सङ्गतिकरणम् | २३८ | १८ |
| अपरुषवादे दासवादे च समन्वयनम् | २३८ | २२ |
| आयुर्बन्धप्रकाराः | २३८ | ३१ |
| षड्विधायुर्बन्धाधिकारिकथनम् | २३९ | १६ |
| गणापक्रमकारणसप्तकम् | २३९ | २२ |
| तत्स्फुटीकरणम् | २३९ | २४ |
| योन्याश्रयेण जीवभेदाः | २४० | ४ |
| भयस्थाननिरूपणम् | २४० | १० |
| छद्मस्थगमकहेत्वभिधानम् | २४० | १८ |
| मूलगोत्रविभागकरणम् | २४० | २७ |
| नयसप्तकस्वरूपाणि | २४१ | ७ |
| आयुरुपक्रमसप्तककथनम् | २४१ | १८ |
| अयं भेदः सोपक्रमायुषामेवेति कथनम् | २४१ | २३ |
| दर्शनभेदाऽऽदर्शनम् | २४१ | २९ |
| विनयभेदप्रकटनम् | २४२ | ६ |
| ज्ञानविनयादिस्वरूपाणि | २४२ | ७ |
| समुद्घातभेदाः | २४२ | २४ |

| विषयाः | पृ. | पं. |
|---|---|---|
| वेदनादिसमुद्घातस्वरूपवर्णनम् | २४२ | ३० |
| प्रवचननिह्नवभेदाः | २४३ | १० |
| अष्टस्थानैरेकाकिविहारप्रतिमायोग्यकथनम् | २४३ | २१ |
| अनालोचनाकारणवर्णनम् | २४४ | २ |
| तद्भावार्थस्फुटीकरणम् | २४४ | ४ |
| गणिसंपद्भेदाः | २४४ | १७ |
| सप्रभेदमाचारसम्पदादिनिरूपणम् | २४४ | १९ |
| आलोचनादानयोग्यकथनम् | २४५ | ६ |
| दोषालोचनार्हवर्णनम् | २४५ | १५ |
| अक्रियावादिभेदाः | २४५ | २२ |
| एकत्ववादिस्वरूपाभिधानम् | २४५ | २७ |
| अनेकत्ववादिमतम् | २४६ | ३ |
| मितवादिमतम् | २४६ | ११ |
| निर्मितत्ववादिमतम् | २४६ | १५ |
| सुखवादिमतम् | २४६ | २० |
| समुच्छेदवादिमतम् | २४६ | २४ |
| नित्यत्ववादिमतम् | २४६ | २८ |
| परलोकाभाववादिमतम् | २४६ | ३२ |
| वचनविभक्तिभेदाः | २४७ | ८ |
| सोदाहरणं तद्व्याख्यानम् | २४७ | ९ |
| आयुर्वेदभेदवर्णनम् | २४७ | २४ |
| प्रथमसमयनैरयिकादिभेदाः | २४८ | १० |
| संयमिभेदाः | २४८ | १८ |
| अप्रमादस्थानभेदाः | २४८ | २८ |
| केवलिसमुद्घातविचारः | २४९ | ८ |
| तत्र शरीरयोगवर्णनम् | २४९ | १९ |
| नव ब्रह्मचर्याणि | २४९ | २५ |
| तद्व्याख्यानम् | २४९ | २७ |
| मैथुनव्रतस्य गुप्तिवर्णनम् | २५० | ८ |
| सत्पदार्थनयव्याख्यानम् | २५० | २६ |
| तच्छब्दार्थप्रकटीकरणम् | २५० | २७ |
| रोगोत्पत्तिकारणप्रकाशनम् | २५१ | १२ |
| दर्शनावरणकर्मभेदाः | २५१ | १८ |
| विकृतिभेदप्ररूपणम् | २५२ | २ |
| पुण्यभेदनिरूपणम् | २५२ | ११ |
| उत्पातादिपापश्रुताख्यानम् | २५२ | १६ |
| निपुणपुरुषाभिधानम् | २५२ | २६ |
| आयुषः परिणामसूचनम् | २५३ | २ |

| विषयाः | पृ. | पं. |
|---|---|---|
| नवनोकषायस्फुटीकरणम् | २५३ | १८ |
| दशधा लोकस्थितिनिवेदनम् | २५३ | २९ |
| शब्दादीन्द्रियार्थानां दशत्ववर्णनम् | २५४ | १४ |
| पुद्गलस्वरूपविशेषविशदीकरणम् | २५४ | २० |
| संयमासंयमविषयादर्शनम् | २५५ | १ |
| प्रव्रज्याभेदप्रकटीकरणम् | २५५ | ७ |
| गतीन्द्रियादिजीवपरिणामपरिष्करणम् | २५५ | १६ |
| द्रव्यार्थपर्यायार्थनयभेदेन परिणामजल्पनम् | २५५ | १९ |
| अजीवपरिणामप्रपञ्चनम् | २५६ | ४ |
| गुरुलघुपर्यायविशेषे नयभेदकथनम् | २५६ | १७ |
| आन्तरिक्षकास्वाध्यायप्रख्यापनम् | २५६ | २५ |
| औदारिकसम्बन्ध्यस्वाध्यायाः | २५७ | ८ |
| अस्थ्यादिनिमित्तास्वाध्याये क्षेत्रकालभाव-प्रमाणप्रकाशनम् | २५७ | ११ |
| सूक्ष्मजीवभेदाः | २५८ | ४ |
| भङ्गसूक्ष्मजीवकथनम् | २५८ | ८ |
| द्रव्यानुयोगप्रकारप्रकाशनम् | २५८ | १४ |
| अनुयोगभेदचतुष्टयटङ्कनम् | २५८ | १७ |
| धर्मादौ विपर्ययमतिलक्षणमिथ्यात्वभेदाः | २५९ | २४ |
| आरोग्यादिसुखभेदवर्णनम् | २६० | ११ |
| उद्गमादिविषयोपघातभेदादर्शनम् | २६० | २४ |
| लब्धिशुद्धिभेदाः | २६० | १ |
| जनपदादिसत्यभेदप्रकाशनम् | २६१ | ७ |
| क्रोधादिविषयमृषाभेदाः | २६१ | २५ |
| उत्पन्नादिविषयमिश्रभाषाभेदाः | २६२ | ३ |
| शस्त्रभेदनिरूपणम् | २६२ | १८ |
| तज्जातादिदोषप्रकाराः | २६२ | २५ |
| मतिभङ्गदोषप्रकाशनम् | २६२ | ३० |
| प्रशास्त्रादिदोषवर्णनम् | २६३ | १ |
| रूढक्षणदोषप्रकाशनम् | २६३ | १० |
| कारणदोषाभिधानम् | २६३ | १२ |
| प्रकारान्तरेण स्वलक्षणादिदोषत्रयवर्णनम् | २६३ | १५ |
| संक्रमणादिदोषाः | २६३ | २६ |
| दानभेदाख्यानम् | २६४ | १ |
| अनुकम्पादिदानभेदव्याख्यानम् | २६४ | ३ |
| प्रत्याख्यानभेदाः | २६४ | २१ |
| अनागतादिप्रत्याख्यानभेदव्याख्यानम् | २६४ | २३ |
| सामाचारीभेदाः | २६५ | ४ |
| इच्छाकारादिभेदव्याख्यानम् | २६५ | ६ |
| सरागसम्यग्दर्शनभेदाः | २६५ | २० |
| निसर्गसम्यग्दर्शनादिभेदव्याख्यानम् | २६५ | २२ |
| संज्ञाभेदाः | २६६ | ८ |
| आहारादिसंज्ञाभेदवर्णनम् | २६६ | ९ |
| धर्मभेदाः | २६६ | २२ |
| ग्रामधर्मादिभेदनिरूपणम् | २६६ | २३ |
| स्थविरभेदाः | २६७ | २ |
| ग्रामस्थविरादिभेदवर्णनम् | २६७ | ४ |
| दशाभेदाः | २६७ | १० |
| बालादिदशावर्णनम् | २६७ | १७ |
| आश्चर्यभेदाः | २६७ | २८ |
| उपसर्गवर्णनम् | २६८ | १ |
| गर्भहरणप्रकाशनम् | २६८ | ५ |
| स्त्रीतीर्थवर्णनम् | २६८ | ७ |
| अभव्यपर्षद्वर्णनम् | २६८ | ११ |
| कृष्णावरकङ्कावर्णनम् | २६८ | १५ |
| चन्द्रसूर्यावतरणकथनम् | २६८ | २१ |
| हरिवंशकुलोत्पत्तिकथनम् | २६८ | २३ |
| चमरोत्पातवर्णनम् | २६८ | २६ |
| अष्टशतसिद्धवर्णनम् | २६९ | ४ |
| असंयतपूजाकथनम् | २६९ | ५ |
| स्थानमुक्तोपसंहारः | २६९ | ७ |
| सरिकोपसंहारः | २६९ | ९ |
| **समवयामुक्तासरिकायाम्** | | |
| एकातिदेशाभिधानम् | २७० | ३ |
| तद्व्याख्यानम् | २७० | ४ |
| जीवाद्याश्रयक्षेत्रमानवर्णनम् | २७० | १० |
| जम्बूद्वीपमानाभिधानम् | २७० | १२ |
| अप्रतिष्ठाननरकाभिधानम् | २७० | १५ |
| पालकविमानमहाविमानमानवर्णनम् | २७० | १७ |
| एकतारकनक्षत्रकथनम् | २७० | २१ |
| युगादावभिजिति प्रथमं चन्द्रयोग इति वर्णनम् | २७० | २२ |
| देवानां स्थितिविशेषकथनम् | २७१ | ४ |
| द्व्यादिपल्योपमस्थितिकानामभिधानम् | २७१ | १७ |
| स्थित्यनुसारेण देवानामुच्छ्वासादिकथनम् | २७१ | २३ |
| एकादिसागरोपमस्थित्याश्रयेणोच्छ्वा-साद्यभिधानं | २७१ | २५ |

| विषयाः | पृ. | पं. |
|---|---|---|
| चित्तसमाधिस्थानभेदाख्यानम् | २७२ | १४ |
| धर्मचिन्तादिदशसमाधिभेदप्रकटनम् | २७२ | १९ |
| उपासकप्रतिमाभेदाः | २७३ | ११ |
| दर्शनश्रावकादिभेदान्वाख्यानम् | २७३ | १४ |
| सम्भोगभेदाः | २७४ | १७ |
| वारत्रयोपरि अशुद्धोपधिग्रहणकर्तुः प्रायश्चित्ताभिधानम् | २७४ | २१ |
| श्रुतविषये संभोग्यासंभोग्यप्रकाशनम् | २७४ | २४ |
| भक्तपानाञ्जलिप्रग्रहनिकाचनेषु तत्कथनम् | २७४ | २६ |
| अभ्युत्थानादिविषये तद्वर्णनम् | २७५ | २ |
| क्रियास्थानभेदाः | २७५ | १० |
| चतुर्दशपूर्वभेदाः | २७६ | १२ |
| पूर्वस्वरूपकथनम् | २७६ | १५ |
| उत्पादपूर्वादिवर्णनम् | २७६ | १७ |
| परमाधार्मिकभेदाः | २७७ | ८ |
| अम्बादितद्भेदवर्णनम् | २७७ | ११ |
| षोडशकषायकथनम् | २७७ | २६ |
| तत्स्फुटीकरणम् | २७७ | २८ |
| संयमासंयमविषयवर्णनम् | २७८ | ६ |
| संयमिनामष्टादशस्थानकथनम् | २७८ | १५ |
| सक्षुद्रकव्यक्तपदसार्थक्यप्रकाशनम् | २७८ | १७ |
| ज्ञाताध्ययनभेदाः | २७८ | २३ |
| उत्क्षिप्ताध्ययनादिवर्णनम् | २७८ | २६ |
| असमाधिस्थानवर्णनम् | २७९ | १० |
| द्रुतचारित्वादितद्भेदप्रकाशनम् | २७९ | १६ |
| शबलभेदाः | २८० | २२ |
| हस्तकर्मादितद्भेदवर्णनम् | २८० | २७ |
| परीषहभेदाः | २८१ | १७ |
| क्षुधादितद्भेदवर्णनम् | २८१ | २० |
| सूत्रकृताङ्गाध्ययनभेदाः | २८२ | ३ |
| चतुर्विंशतितीर्थंकराः | २८२ | १४ |
| भावनाभेदाः | २८२ | २५ |
| प्रथममहाव्रतभावनाः | २८३ | ३ |
| द्वितीयमहाव्रतभावनाः | २८३ | ११ |
| तृतीयमहाव्रतभावनाः | २८३ | १६ |
| चतुर्थमहाव्रतभावनाः | २८३ | १९ |
| पञ्चममहाव्रतभावनाः | २८३ | २५ |

| विषयाः | पृ. | पं. |
|---|---|---|
| भावनाभावे मोहनीयसद्भावनैयत्यकथनम् | २८३ | १० |
| अभवसिद्धिकानामेतानि सदैवेति कथनम् | २८४ | १० |
| अनगारगुणवर्णनम् | २८४ | ११ |
| व्रतपञ्चकादिगुणव्यावर्णनम् | २८४ | १६ |
| देवगतियोग्यकर्मबन्धकथनम् | २८४ | २५ |
| नैरयिकयोग्यकर्मबंधकथनम् | २८५ | २ |
| पापश्रुताख्यानम् | २८५ | ५ |
| भौमादिश्रुताभिधानम् | २८५ | ८ |
| महामोहनीयस्थानवर्णनम् | २८५ | २१ |
| त्रिंशतां तेषां संक्षेपतो वर्णनम् | २८५ | २२ |
| सिद्धादिगुणकथनम् | २८६ | २८ |
| प्रशस्तयोगसङ्ग्रहवर्णनम् | २८७ | ३ |
| तेषां द्वात्रिंशद्भेदकथनम् | २८७ | ८ |
| आशातनाभेदवर्णनम् | २८७ | १७ |
| तीर्थकृदतिशयवर्णनम् | २८८ | १४ |
| अर्धमागध्या धर्माख्यानकथनम् | २८८ | २० |
| अर्धमागधीस्वरूपम् | २८८ | २८ |
| वचनातिशयनिरूपणम् | २८९ | ५ |
| शब्दापेक्षयाऽतिशयसप्तकवर्णनम् | २८९ | ६ |
| अर्थापेक्षया महार्थाद्यतिशयप्रकाशनम् | २८९ | ९ |
| तीर्थकृतां सम्पत्तिवर्णनम् | २८९ | २७ |
| महावीरश्रमणकालाभिधानम् | २९० | १२ |
| नरकावाससंख्यानिरूपणम् | २९० | १६ |
| प्रथमपृथिव्यां तदावासकथनम् | २९० | १९ |
| चतुर्थपृथिव्यां तदावासवर्णनम् | २९० | २६ |
| पञ्चमपृथिव्यां तदावासवर्णनम् | २९० | ३० |
| ऋषिभाषिताध्ययनसंख्याकथनम् | २९१ | ६ |
| समयक्षेत्रप्रमाणादिवर्णनम् | २९१ | १२ |
| सीमन्तकादीनां प्रमाणवर्णनम् | २९१ | १७ |
| दृष्टिवादस्य मातृकापदसंख्या | २९१ | २६ |
| ब्राह्मीलिप्यां मातृकाक्षरसंख्या | २९१ | ३१ |
| अग्निभूतेरगारवासकालसंख्यानम् | २९२ | ५ |
| धर्मजिनस्य गणादिनिरूपणम् | २९२ | १२ |
| भिक्षुप्रतिमाविशेषस्य कालप्रकाशनम् | २९२ | १८ |
| भिक्षुनिक्षेपाः | २९२ | २० |
| भावभिक्षुभेदाः | २९२ | २८ |
| सप्तसप्तकिका प्रतिमा | २९३ | ४ |

| विषयाः | पृ. | पं. |
|---|---|---|
| मुनिसुव्रतस्याऽऽर्यिकामानम् | २९३ | १० |
| मुनिनिक्षेपाः | २९३ | १४ |
| अनन्तजिनपुरुषोत्तमयोर्देहमानम् | २९३ | २३ |
| एकपञ्चाशत्प्रकृतिककर्मकथनम् | २९३ | २९ |
| द्विपञ्चाशत्प्रकृतिककर्मवर्णनम् | २९४ | २ |
| संमूर्च्छितोरःपरिसर्पाणां स्थित्यभिधानम् | २९४ | ८ |
| पर्याप्तकापर्याप्तकविवेकः | २९४ | १४ |
| भरतैरवतयोरुत्सर्पिण्यामुत्तमपुरुषसंख्या | २९४ | १७ |
| पुरुषनिक्षेपाः | २९४ | २४ |
| उत्तममध्यमजघन्यपुरुषाभिधानम् | २९४ | २८ |
| प्रथमद्वितीयपृथिव्योर्नरकावाससंख्या | २९५ | ५ |
| तस्यैव स्फुटीकरणम् | २९५ | ६ |
| जम्बूद्वीपे नक्षत्रचन्द्रसंख्या | २९५ | १५ |
| तद्व्याख्यानम् | २९५ | १६ |
| गणिपिटकानामध्ययनसंख्या | २९५ | २३ |
| तद्विशदीकरणम् | २९५ | २५ |
| प्रथमद्वितीयपञ्चमपृथिवीषु निरयावाससंख्या | २९६ | २ |
| चन्द्रवर्षस्य ऋतुदिनप्रमाणम् | २९६ | ८ |
| उदितस्थाने सूर्यस्य पुनरुद्गमकालमानम् | २९६ | १५ |
| मण्डलसंख्या | २९६ | १६ |
| एकमुहूर्ते सूर्यस्य गतिवर्णनम् | २९६ | २१ |
| ऋतुमासपरिमाणं युगस्य | २९६ | ३० |
| चन्द्रस्य प्रतिदिनावस्थावर्णनम् | २९७ | ६ |
| चन्द्रस्य वृद्ध्यपवृद्धिभागवर्णनम् | २९७ | ७ |
| चन्द्रमासपरिमाणम् | २९७ | ९ |
| निषधे सूर्यमण्डलाख्यानम् | २९७ | २१ |
| नीलवति सूर्यमण्डलप्रकाशनम् | २९७ | २६ |
| अष्टाष्टमिकाप्रतिमाकथनम् | २९७ | ३१ |
| तद्व्याख्यानम् | २९८ | १ |
| सौधर्मावतंसकस्य प्रतिदिशं भौमसंख्या | २९८ | ६ |
| तदभिप्रायप्रकाशनम् | २९८ | ७ |
| सूर्यचन्द्रप्रकाश्यक्षेत्रकथनम् | २९८ | ११ |
| मानुषक्षेत्रस्वरूपनिरूपणम् | २९८ | १३ |
| तत्र चन्द्रसूर्यसंख्याप्रतिपादनम् | २९८ | १७ |
| चन्द्रसूर्ययोर्मानुषे पङ्क्तिनिरूपणम् | २९८ | १८ |
| युगस्य नक्षत्रमाससंख्यावर्णनम् | २९८ | २८ |
| नक्षत्रमासमानवर्णनम् | २९८ | २९ |

| विषयाः | पृ. | पं. |
|---|---|---|
| धातकीखण्डेऽष्टषष्टिचक्रवर्त्यादीनामभिधानम् | २९९ | ५ |
| चक्रवर्तिवासुदेवयोरेकदा तावन्मानस्यासम्भवमाशंक्य समाधानविधानम् | २९९ | ६ |
| समयक्षेत्रे वर्षादीनां संख्याकथनम् | २९९ | १३ |
| सामान्येन क्षेत्रवर्षवर्षधराणामभिधानम् | २९९ | १४ |
| मोहनीयस्य स्थितिकथनम् | २९९ | २१ |
| स्थितिबन्धाभिधानम् | २९९ | २३ |
| स्थितिद्वैविध्यम् | २९९ | ३१ |
| उभयोः स्थितिमानकथनम् | ३०० | १ |
| अबाधाकालप्रकाशनम् | ३०० | २ |
| कर्मनिषेककथनम् | ३०० | ५ |
| सूर्यस्यावृत्तिकथनम् | ३०० | ११ |
| तस्याः संघटनम् | ३०० | १३ |
| द्वासप्ततिकलाभिधानम् | ३०० | २३ |
| लेखद्वैविध्यनिरूपणम् | ३०० | २५ |
| अक्षरदोषाभिधानम् | ३०० | २९ |
| गणितादिकलावर्णनम् | ३०० | ३० |
| विजयबलदेवस्य सिद्धताकथनम् | ३०१ | २० |
| अग्निभूतेः सिद्धताख्यापनम् | ३०१ | २४ |
| शीतलस्य गृहावासमानम् | ३०१ | २८ |
| शान्तेः गृहावासकालः | ३०२ | ३ |
| विद्युत्कुमाराणां भवनावाससंख्या | ३०२ | ८ |
| भवनमात्रसंख्याभिधानम् | ३०२ | ९ |
| असुरकुमारादीनां भवनसंख्या | ३०२ | १३ |
| गर्दतोयतुषितानां परिवारसंख्या | ३०२ | १९ |
| तत्संघटनम् | ३०२ | २० |
| वैश्रवणस्याधिपत्यम् | ३०२ | २६ |
| तद्व्याख्या | ३०२ | २७ |
| विजयादिद्वारान्तरनिरूपणम् | ३०३ | २ |
| तद्व्यवस्थापनम् | ३०३ | ४ |
| श्रेयांसादीनां देहमानवर्णनम् | ३०३ | १० |
| तद्विमर्शनम् | ३०३ | ११ |
| नवनवमिकाप्रतिमा | ३०३ | १८ |
| तन्निरूपणम् | ३०३ | १९ |
| महावीरगर्भान्तरगमनम् | ३०३ | २४ |
| तद्विशदीकरणम् | ३०३ | २६ |
| नरकयोन्योः संख्या | ३०४ | २ |

| विषयाः | पृ. | पं. |
|---|---|---|
| नरकावाससंख्याविभागः | ३०४ | १ |
| योनिसंख्याविभागः | ३०४ | ५ |
| कारिकाव्यावर्णनम् | ३०४ | ७ |
| उत्पत्तिस्थानानन्त्यशङ्कानिरासः | ३०४ | १४ |
| आचाराङ्गस्योद्देशनकालकथनम् | ३०४ | २० |
| तव्यवस्थापनम् | ३०४ | २१ |
| सुविधेर्गणादिकथनम् | ३०४ | २७ |
| तद्व्याख्यानम् | ३०४ | २८ |
| मेरुपूर्वान्तगोस्तूभचरमान्तयोरन्तराभिधानम् | ३०५ | २ |
| तत्समर्थनम् | ३०५ | ४ |
| ऋषभजिनस्य संसारादुपरमकालः | ३०५ | १० |
| तद्विशदीकरणम् | ३०५ | १२ |
| अजितशान्तिनाथयोर्गणादिवर्णनम् | ३०५ | १८ |
| परवैयावृत्त्यकर्मप्रतिमाकथनम् | ३०५ | २३ |
| तन्निरूपणम् | ३०५ | २४ |
| प्रतिमाभेदाः | ३०६ | ७ |
| तद्विभागपूर्वकव्याख्या | ३०६ | ८ |
| विषमाहोरात्रकृत्सूर्यमण्डलवर्णनम् | ३०६ | १८ |
| तद्विमलीकरणम् | ३०६ | १९ |
| अजितस्यावधिज्ञानिसंख्या | ३०६ | २८ |
| कुन्थुनाथस्य परमायुर्वर्णनम् | ३०६ | ३१ |
| वायुकुमाराणां भवनसंख्या | ३०७ | ४ |
| तद्व्यावर्णनम् | ३०७ | ५ |
| कर्माष्टकोत्तरप्रकृतयः | ३०७ | १० |
| तन्निरूपणम् | ३०७ | ११ |

| विषयाः | पृ. | पं. |
|---|---|---|
| नन्दनवनस्योपरिष्टात् चरमान्ततः पाण्डुकवनस्याधस्तनचरमान्तं यावदन्तरकथनम् | ३०७ | २२ |
| नन्दनवनस्य पूर्वचरमान्तात्पश्चिमचरमान्तं यावदन्तरकथनम् | ३०७ | २८ |
| दशदशमिकाभिक्षुप्रतिमा | ३०८ | २ |
| तद्व्याख्यानम् | ३०८ | ३ |
| आचाराङ्गप्रतिपाद्यविषयाः | ३०८ | ८ |
| सूत्रकृताङ्गप्रतिपाद्यविषयाः | ३०८ | ११ |
| स्थानाङ्गस्थापनीयविषयाः | ३०८ | २९ |
| समवायाङ्गसमवयनविषयाः | ३०९ | ८ |
| व्याख्याप्रज्ञप्तिप्रज्ञाप्यविषयाः | ३०९ | १४ |
| ज्ञाताधर्मकथाकथनीयविषयाः | ३०९ | २८ |
| उपासकदशोपास्यविषयाः | ३१० | ९ |
| अन्तकृतदशाज्ञाप्यन्तकृतविषयादयः | ३१० | २० |
| अनुत्तरोपपातिकदशावक्तव्यम् | ३१० | २९ |
| तद्व्याख्यानम् | ३१० | ३१ |
| प्रश्नव्याकरणाभिधेयाः | ३११ | १० |
| तदर्थव्यावर्णनम् | ३११ | १२ |
| विपाकश्रुतविषयाः | ३११ | १८ |
| दृष्टिवादवक्तव्यता | ३११ | २६ |
| द्वादशाङ्गस्यानित्यतादि | ३१२ | ६ |
| तद्विराधकस्य फलम् | ३१२ | १३ |
| तदाराधकस्य फलम् | ३१२ | १८ |
| समवायोपसंहरणम् | ३१२ | २० |
| मुक्तासरिकोपसंहारः | ३१२ | २२ |


इति शुभं भूयात्

---

# संशोधनीयम्

अस्याः सूत्रार्थमुक्तावल्याः पञ्चममुक्तासरिकान्तगतः श्लोकः (पृ० ३१२ गतः) पिपठिषुभिरेवं संशोध्य पठनीयः, यथा—

समवायाङ्गपयोधेरहमहमिकया समुत्थिता मुक्ताः।
कस्य मनस्युत्कण्ठां नोद्दीपयति स्वसात्कर्तुम्॥

दुह्यन्ते तत्र तदा न प्रविशेत्, अन्यथा श्रद्धया तदानीमागतं यतिं विलोक्य गृहपतिरस्मै प्रभूतं ददामीति वत्सकपीडां विदध्यात्, त्रसेयुर्वा गावो विलोक्य तम्, आदिना च यत्राहार उपस्क्रियमाणो भवति तदा तत्र नो यायात्, त्वरया पाकाय ते कृतप्रयत्ना भवेयुस्ततः संयमविराधनाप्रसङ्गः स्यादित्यपि ग्राह्यम्, एकान्ते चावस्थितो वृत्तगोदोहनादि विदित्वा ततस्तत्र यायात्। अप्राप्तमातृस्थान इति, यः कश्चित्साधुर्जङ्घाबलपरिक्षीणतया मासकल्पविहारितया वैकत्रैव क्षेत्रे तिष्ठन्ननुग्रामं गच्छतः प्राघूर्णिकान् यद्येवं वदेत्, क्षुल्लकोऽयं ग्रामः सूतकादिना सन्निरुद्धोऽल्पगृहभिक्षादो वा, भवन्तो भिक्षाचर्यार्थं बहिर्ग्रामं व्रजतेति, तथा यो भिक्षुरहं भिक्षाकालादर्वागेव भ्रातृव्यश्वशुरादिसम्बन्धिगृहं भिक्षार्थं प्रवेक्ष्यामि तत्र सरसं भक्तं पेयञ्च गृहीत्वा भुक्त्वा पीत्वा पतद्ग्रहं संलिख्य प्रमृज्य च प्राप्ते भिक्षावसरेऽविकृतवदनः प्राघूर्णिकभिक्षुभिः साकं पिण्डप्रतिज्ञया गृहपतिकुलं प्रवेक्ष्यामीत्येवमभिसन्धत्ते स मातृस्थानं प्रतिषिद्धं संस्पृशति, एवं यत्राग्रपिण्डाद्यर्थं श्रमणब्राह्मणादयो वयमत्र लप्स्यामह इति त्वरितं त्वरितमुपसंक्रामन्ति तत्राहमपि त्वरितमुपसंक्रमामीति विचिन्तयन् भिक्षुर्मातृस्थानं स्पृशति, अतो नैवं कुर्यात्। अपिहितद्वारमिति, यस्य गृहपतेर्द्वारं कपाटादिना पिहितं तद्गृहं द्वारमननुज्ञयोद्घाट्य न प्रविशेन्न वा प्रत्युपेक्षणप्रमार्जनव्यतिरेकेणोद्घाटयेत्, अन्यथा गृहपतेः प्रद्वेषस्य वस्तुनो नाशे साधौ शङ्कायाः पश्वादिप्रवेशस्य च प्रसङ्गेन संयमात्मविराधना स्यात्। ग्लानादिकारणे सति तु स्थगितद्वारिस्थः शब्दं कुर्यात्, स्वयं वा यथाविधि उद्घाट्य प्रविशेत्। तथा निर्गतश्रमणमिति, स्वतः पूर्वं प्रविष्टान् श्रमणादीन् विज्ञाय दातृप्रतिग्राहकासमाधानान्तरायभयादेकान्ते व्यवस्थितो भवेत्, तत्र च यदि दाता चतुर्विधमाहारमादाय दत्त्वा च बहवो यूयं भिक्षार्थमुपस्थिताः, व्याकुलतया नाहमिदं विभज्य दातुं समर्थोऽतो निखिलार्थं युष्मभ्यं मया दत्तमिदं स्वरुच्यैकत्र भुङ्ग्ध्वं विभज्य वा गृह्णीध्वमिति ब्रूयात्तदा तदाहारादिकमुत्सर्गतो न ग्राह्यम्, सति कारणे गृह्यमाणं श्रमणाद्यन्तिके गत्वा गृहपत्युक्तं निवेदयन्तं यदि कश्चित् श्रमणस्त्वमेवास्माकं परिभाजयेति ब्रूयात्तदाऽसति कारणे नैवं कुर्यादिति ॥ ५६ ॥

नियमान्तरमाचष्टे—

## द्वारावलम्बनधावनोदकप्रक्षेपस्थानादिषु न तिष्ठेत् ॥ ५७ ॥

**द्वारेति,** दातृगृहद्वारशाखावलम्बनेन न स्थेयात्, जीर्णत्वादितः पतनसम्भवात्संयमात्मविराधनासम्भवात्तथोपकरणधावनोदकप्रक्षेपस्थान आचमनप्रवाहभूमौ वा न तिष्ठेत्, प्रवचनजुगुप्सासम्भवात्, परिदृश्यमानस्नानादिक्रिये स्थाने वा न तिष्ठेत्, दर्शनशङ्कया निःशङ्कं गृहस्थक्रियाऽनिवृत्त्या निरोधप्रद्वेषसम्भवात्। नापि गवाक्षभित्तिसन्धिचौरखातादिद्वारेणाङ्गुलीनिर्देशेन कायनमनोन्नमनाभ्यामालोकयेदन्यस्मै वा दर्शयेत्, हृतनष्टादौ वस्तुनि स्वस्मिन् शङ्कोत्पादप्रसङ्गात्। न वा गृहपतिमङ्गुलीचालनादिना भयमुपदर्श्य वाग्भिः स्तुत्वा वा याचेत, अलाभे वा परुषं वदेदिति ॥ ५७ ॥

नियमान्तरमाह—

## उदकादिसंसृष्टं मालाहृतं मृत्तिकोपलिप्तं वीजनेन शीतमग्राह्यम् ॥ ५८ ॥

**उदकादीति,** यदाहारादि साक्षादुदकादिना सचित्तेन संसृष्टं यच्च साधुभिक्षादानार्थं शीतो-

विवर्त्ताः, सर्वेऽप्येते पुरुषमेवाभिव्याप्य तिष्ठन्ति, यथा हि शरीरिणां संसारान्तर्गतानां कर्मवशगानां यो गण्डादिर्भवति स शरीरावयवभूतः शरीराभिवृद्धौ तस्याभिवृद्धिः स च शरीरं व्याप्य व्यवस्थितो न तु शरीरात् पृथग्भूतः, तदुपशमे च शरीरमेवाश्रित्य स वर्त्तते न ततो बहिर्भवत्येवमेवामी धर्माश्चेतनाचेतनारूपास्ते सर्वेऽपीश्वरकर्तृका न त ईश्वरात् पृथक् कर्त्तुं पार्यन्ते तद्विकारापगमे चात्मानमेवाश्रित्यावतिष्ठन्ते न तस्माद्बहिर्भवन्ति, उक्तञ्च—'पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यमि'ति, तथा 'एक एव हि भूतात्मा भूते भूते प्रतिष्ठितः । एकधा बहुधा चैव दृश्यते जलचन्द्रवदि'ति । तथा वदन्ति च द्वादशाङ्गं मिथ्या, अनीश्वरप्रणीतत्वात्, स्वरुचिविरचितरथ्यापुरुषवाक्यवत्, नैतत्तथ्यमिति तन्मतं निराकरोति **नेति,** सर्वमीश्वरकर्तृकमित्यभ्युपगमे किमसौ परान् स्वत एव क्रियासु प्रवर्त्तयते, उतान्यप्रेरितः, आद्ये परेऽपि स्वत एव प्रवर्त्तेरन् किमीश्वरेण, द्वितीये त्वनवस्था, ईश्वरोऽन्येन प्रेर्यते सोऽप्यन्येनेत्यादि । किञ्चासावीश्वरो महापुरुषतया वीतरागोपेतस्सन्नेकान्नरकयोग्यासु क्रियासु प्रवर्त्तयति, अपरांस्तु स्वर्गापवर्गयोग्यास्विति कथं स्यात्, न च ते पूर्वशुभाशुभचरितोदयादेव तथाविधक्रियासु प्रवर्त्तन्ते, ईश्वरस्तु निमित्तमात्रमिति वाच्यम्, प्राक्तनाशुभप्रवृत्तेरपि तदायत्तत्वात्, तत्रापि प्राक्तनाशुभाचरणान्तरस्य हेतुत्वे तत एव शुभाशुभस्थानप्राप्तिसम्भवे किमीश्वरपरिकल्पनया, संस्थानविशेषवत्त्वं हेतुरप्यसिद्धाविनाभावक इत्यसकृदावेदितमेव सम्मति सोपाने, जगत ईश्वरकर्तृत्वे तस्यैकरूपत्वेन जगद्वैचित्र्यस्यासिद्धिश्च । आत्माद्वैतपक्षस्त्वत्यन्तं युक्त्यसङ्गत एव, आत्मन एकत्वात् प्रमाणमिदं प्रमेयमिदं प्रतिपाद्योऽयम्, प्रतिपादकोऽयम्, हेतुरयम्, दृष्टान्तोऽयम्, तदाभासोऽयमित्यादिभेदावगमो न स्यात् ततश्च कथं जगद्वैचित्र्यं घटेत, निर्हेतुकत्वे नित्यं सत्त्वमसत्त्वं वा भवेत् । तदेवमीश्वरकर्तृकत्वमात्माद्वैतञ्च युक्तिभिर्विचार्यमाणो न कथञ्चिद्घटां प्राञ्चति, तथाप्येते स्वदर्शनमोहिता दुःखान्नातिमुच्यन्ते, विप्रतिपन्नाश्चासमञ्जसभाषितया तमेव पक्षं श्रद्दधानाः कामोपभोगेषु मूर्च्छिता न कदापि निरतिशयसुखानन्दभाजो भवन्ति ॥ ५६ ॥

अथ नियतिवादं निराकरोति—

## नियतिकृतं सर्वमनिष्टस्यापि कर्त्तृत्वादिति चेन्न, तस्या एवाभावात् ॥ ५७ ॥

**नियतीति,** सर्वं लोके नियतिकृतमेव, न तत्र कालो वेश्वरो वा पुरुषकारो वा प्रकृतिर्वा कारणम्, समानक्रियाणामपि कस्यचिदेवार्थसिद्धेः, यदि हि नियतिप्रेरितं जगन्न स्यात्, कश्चिन्नियतवादी कश्चिदनियतवादी कश्चित्क्रियावादी कश्चिदक्रियावादीति न तुल्यता भवेत्, किन्तु नियतिवशेनैव तथावादाश्रयणात्समानता, पुरुषकारादिकृतत्वे च दुःखोत्पादकक्रियासमारम्भमात्मा न कुर्यात्, न हि कस्यचिरस्यात्माऽनिष्टः, येन तस्य परितापादिजनकमनुष्ठानं विदध्यात्, किन्तु नियत्यैवासावनिच्छन्नपि तत्कार्यते येन दुःखपरम्पराभाग्भवति, तस्मात्सर्वे प्राणिनो नियतित एव तत्र तत्र नानाविधशरीरसम्बन्धं ततो वियोगं चानुभवन्ति, न तु कर्मादिनेति । नियतौ प्रमाणाभावं विचिन्त्य तन्मतं दूषयति, **तस्या एवाभावादिति,** नियतेरेव निर्युक्तिकतयाऽभावादित्यर्थः, तथा हि—किमसौ नियतिः स्वत एव नियतिस्वभावा, अन्यथा वा, स्वत एवेति चेत्कुतो न पदार्थानामेव तथा स्वभावत्वम्, येन बहुदोषा नियतिराश्रयणीया भवेत् । अन्यथा सा नियम्यत इति चेत्किं न पश्यति भवाननवस्थाम् । किंच

एवमात्मन एकत्वमभ्युपगच्छन्तोऽपि केचन तं निष्क्रियं वदन्ति तन्निराकरणाय क्रियावत्त्वं तत्कारणञ्चाह—

**तस्य दण्डः क्रिया चैका वधकरणसामान्यात् ॥ ३ ॥**

**तस्येति,** एकानेकरूपस्यात्मन इत्यर्थः, आत्मा ज्ञानाद्यैश्वर्यापहारतो दण्ड्यते निःसारीक्रियतेऽनेनेति दण्डः, स च द्रव्यतो भावतश्च, द्रव्यतो यष्ट्यादिर्भावतो दुष्प्रयुक्तमनःप्रभृति । तत्प्रयुक्त आत्मा क्रियामाचरति, सा च कायिक्यादिरूपा, दण्डः क्रिया चैका स्वस्वविशेषाविवक्षणात्, यद्वा दण्डक्रियाशब्दाभ्यां त्रयोदशस्थानानि ग्राह्याणि, तत्रार्थानर्थहिंसाऽकस्माद्दृष्टिविपर्यासदण्डरूपः पञ्चविधो दण्डः, तस्य चैकत्वं वधसामान्यात्, मृषाप्रत्ययादत्तादानप्रत्ययाऽऽध्यात्मिकी मानप्रत्यया मित्रद्वेषप्रत्यया मायाप्रत्यया लोभप्रत्ययैर्यापथिकी चेत्यष्टविधा क्रिया, तदेकत्वञ्च करणमात्रसामान्यात्, एतेनात्मनः क्रियावत्त्वमुक्तं भवति, परैर्ह्यात्मनोऽक्रियत्वेऽपि भोक्तृत्वमभ्युपगतम्, तच्च भुजिक्रियानिर्वर्त्तनसामर्थ्ये सति सम्भवति तस्मात्क्रियावत्त्वं सिद्धमेव, न च प्रकृतिः करोति, पुरुषश्च प्रतिबिम्बन्यायेन भुङ्क्त इति वाच्यम्, क्रियामन्तरेण प्रतिबिम्बस्याप्यसंभवात्, प्रतिबिम्बो हि रूपान्तरपरिणमनरूपः, प्रकृतिविकारभूतबुद्धेरेव सुखार्थप्रतिबिम्बनत्वे तु सुतरामात्मनो भोगाभावः प्रसक्त इति ॥ ३ ॥

आत्मन आधारप्रदर्शनमुखेनाजीवानामेकानेकत्वं तथैव दर्शयति—

**लोकालोकधर्माधर्मबन्धमोक्षपुण्यपापास्रवसंवरवेदनानिर्जरा अप्येकरूपाः सामान्यात् ॥ ४ ॥**

**लोकेति,** धर्माधर्मास्तिकायव्यवच्छिन्नो निखिलद्रव्याधारभूत आकाशविशेषः, आकाशस्तु लोकरूपोऽलोकरूपश्च, तत्र चतुर्दशरज्जुप्रमाणो लोकोऽसंख्यातप्रदेशात्मकोऽपि तत्प्रदेशाविवक्षया द्रव्यार्थतया वैकरूपः, अलोकश्चानन्तप्रदेशात्मकोऽपि तत्प्रदेशाविवक्षया द्रव्यार्थतया वैकः । अथ वा नामस्थापनाद्रव्यक्षेत्रकालभवभावपर्यवभेदेनाष्टधा, नामस्थापने प्रसिद्धे, द्रव्यलोको जीवाजीवरूपः, क्षेत्रलोकोऽनन्तप्रदेशात्मकमाकाशमात्रम्, काललोकः समयावलिकादिः, भवलोकः स्वस्मिन् स्वस्मिन् भवे वर्त्तमाना नारकदेवमनुष्यतिर्यग्योनिकाः सत्त्वाः, भावलोक औदयिकौपशमिकक्षायिकक्षायोपशमिकपारिणामिकसान्निपातिकरूपः, पर्यवलोकश्च पर्यायमात्रम्, एतेषामेकत्वन्तु केवलज्ञानावलोकनीयत्वसामान्यात् । ननु निखिलद्रव्याधारभूताकाशसद्भावे किं मानमिति चेन्न, अस्त्याकाशम्, जीवादिपदार्थानां साधारत्वान्यथानुपपत्तेरिति मानसद्भावात्, न च धर्माधर्मास्तिकायावेव तदाधारौ, तयोस्तद्गतिस्थितिसाधकत्वात्, न चान्यसाध्यं कार्यमन्यः साधयत्यतिप्रसङ्गात्, अयमाकाशास्तिकायः सर्वद्रव्याणां साधारणावकाशदाता लोकालोकप्रकारेणोच्यते, स च सावयवः प्रदेशव्यवहारस्य तत्र दर्शनात्, न चायं व्यवहारो मिथ्या, तन्निमित्तस्याभावात् । ननु लोकैकदेशस्य प्रत्यक्षत्वात्तद्देशान्तरमपि स्याद्बाधकप्रमाणशून्यत्वात्, अलोकस्तु कथं स्यात्तस्य देशतोऽप्यप्रत्यक्षत्वादिति चेन्न, अस्ति लोकस्य विपक्षो व्युत्पत्तिमच्छुद्धपदाभिधेयत्वात्, यद्व्युत्पत्तिमता शुद्धशब्देनाभिधीयते तस्य विपक्षोऽस्ति यथा घटस्याघटः, लोकश्च व्युत्पत्तिमच्छुद्धपदाभिधेयः, तस्मात्सविपक्षः, यश्च लोकस्य विपक्षः सोऽलोक इति तत्सिद्धेः । न चालोको घटादिरेव भवेत् किं वस्त्वन्तरेणेति वाच्यम्, लोकानुरूपस्यैवालोकस्याऽऽ-

दकशीतोदकैः स्नापयित्वा मनोज्ञं भक्तदोषरहितं स्थालीपाकं सव्यञ्जनं भोजयित्वा यदि यावज्जीवं स्कन्ध आरोप्य परिवहेत्तावताऽपि तावदशक्यप्रतीकारौ भवतः, किन्तु तौ यदा भगवदुदितं धर्ममाख्याय प्रभेदतो बोधयित्वाऽनुष्ठानतो धर्मे स्थापयति तदाऽनेनैव धर्मस्थापनेन मातापित्रोः सुखेनैव प्रत्युपक्रियते धर्मस्थापनस्य महोपकारत्वात् । तथा कोऽपि दरिद्रः केनापि भर्त्रा धनदानादिनोत्कृष्टः कृतः स ततो भर्तुः समक्षमसमक्षं वा विपुलभोगसमुदयेन युक्तोऽभूत्, अथ लाभान्तरायोदयेनासहायायामापदि स भर्ता दरिद्रीभूतः सन्नमन्यत्राणतया पूर्वदरिद्रस्य सम्प्रति समुत्कृष्टस्य यदा पार्श्वे आगच्छति तदाऽयं पूर्वोपकारिणे भर्त्रे यदि सर्वस्वं ददाति तदाऽपि न कृतप्रत्युपकारो भवति, किन्तु भगवदुदितधर्मसंस्थापनेनैवेति । एवमेव कश्चिन्मनुजो धर्माचार्येण केनचिद्धार्मिकं सुवचनं निशम्य मनसाऽवधार्य कालं गतोऽन्यतरेषु देवेषु देवत्वेनोत्पन्नः स देवो यदि धर्माचार्यं दुर्भिक्षदेशात्सुभिक्षदेशं कान्ताराग्निष्कान्तारं देशं वा नयेत्, दीर्घकालिकाद्रोगातङ्काद्वा विमोचयेत्तथापि न स कृतप्रत्युपकारो भवत्यपि तु धर्मस्थापनेनैव कृतोपकारो भवतीति ॥ ४७ ॥

धर्मस्य स्थानत्रयेऽवतारमाह—

**अनार्त्तध्यानसम्यग्दृष्टित्वयोगवाहित्वानि संसारातिक्रमणहेतवः ॥ ४८ ॥**

**अनार्त्तध्यानेति,** आर्त्तध्यानाभावः, सम्यग्दृष्टित्वरूपा संपद्, योगवाहिता-श्रुतोपधानकारित्वं समाधिस्थायिता वा, एभिस्त्रिभिरनगारा अनाद्यनन्तं संसारं व्यतिक्रामन्तीत्यर्थः ॥ ४८ ॥

अथ चतुर्विंशतिदण्डकापेक्षयोपध्यादीन्याह—

**एकेन्द्रियनारकवर्जानां कर्मशरीरभाण्डोपधयः, तत्परिग्रहाः, नारकादीनां त्रिविधोपधिपरिग्रहौ सचित्ताचित्तमिश्ररूपौ ॥ ४९ ॥**

**एकेन्द्रियेति,** उपधीयते पोष्यते जीवोऽनेनेत्युपधिः, कर्मैवोपधिः कर्मोपधिरेवं शरीरोपधिः, भाजनोपकरणं भाण्डं सैवोपधिर्भाण्डोपधिः । नारकैकेन्द्रियाणामुपकरणस्याभावात्तद्वर्जनम्, परिग्रहो मूर्च्छाविषयः, इह चैषामयमिति व्यपदेशभागेव ग्राह्यः, स च नारकैकेन्द्रियाणां कर्मादिरेव सम्भवति न भाण्डादिरिति तद्वर्जनम् । प्रकारान्तरेणोपधिपरिग्रहावाह नारकादीनामिति, सचित्तोपधिर्यथा शैलं भाजनं अचित्तो वस्त्रादिः, मिश्रः परिणतप्रायं शैलभाजनमिति, नारकाणां सचित्तोपधिः शरीरं, अचित्त उत्पत्तिस्थानम्, मिश्रः शरीरमेवोच्छ्वासादिपुद्गलयुतम् तेषां सचेतनाचेतनत्वेन मिश्रत्वात् ॥ ४९ ॥

जीवधर्माश्रयेणाह—

**पञ्चेन्द्रियाप्रणिधानं संयतमनुष्याणां सुप्रणिधानं योगात्त्रिधा ॥५०॥**

**पञ्चेन्द्रियेति,** पञ्चेन्द्रियमात्रजीवानां प्रणिधानमेकाग्रता तच्च मनःप्रभृति सम्बन्धिभेदात्त्रिधा, तच्च सर्वेषां पञ्चेन्द्रियाणाम्, तदन्येषां न, सामस्त्येन योगाभावात्, तत्र शुभप्रणिधानं संयतमनुष्याणामेव, अस्य चारित्रपरिणामरूपत्वादित्यावेदयन्नाह—संयतमनुष्याणामिति ॥ ५० ॥

अथ कषायाश्रयेणाह—

**वंशीमूलमेषशृङ्गगोमूत्रिकावलेखनिकाकेतनसमा माया शैलास्थिदारुतिनिशलतास्तम्भसमानो मानः कृमिकर्दमखञ्जनहरिद्रारागरक्तवस्त्रसमो लोभः पर्वतपृथिवीरेणुजलराजिसमः क्रोधः ॥ ११० ॥**

**वंशीमूलेति,** केतनं सामान्यतो वक्रं वस्तु, वंशीमूलञ्च तत्केतनञ्च वंशीमूलकेतनं, मेषशृङ्गं गोमूत्रिका च प्रतीता, अवलिख्यमानस्य वंशशलाकादेर्या प्रतन्वी त्वक् साऽवलेखनिकेति, वंशीमूलकेतनादिसमत्वञ्च मायायास्तद्वतामनार्जवभेदात्, तथा हि यथा वंशीमूलमतिगुपिलवक्रमेवं कस्यचिन्मायापीत्येवमल्पाल्पतराल्पतमानार्जवत्वेनान्यापि भावनीया, इयञ्चानन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यानावरणसंज्वलनरूपा क्रमेण ज्ञेया, वंशीमूलकेतनसमानमायामनुप्रविष्टो जीवो मृत्वा नैरयिकेषूत्पद्यते, मेषविषाणकेतनसमानमायामनुप्रविष्टस्तिर्यग्योनिषु गोमूत्रिकाकेतनसमानमायामनुप्रविष्टो मनुष्येषु, अवलेखनिकाकेतनसमानमायामनुप्रविष्टश्च देवेषु, एवं मानाद्यनुप्रविष्टोऽपि । अनुप्रविष्ट उदयवर्त्तीत्यर्थः । शैलस्तम्भः शिलाविकारभूतः स्थाणुः, एवमग्रेऽपि, तिनिशो वृक्षविशेषः तस्य लता—कम्बा, सा चात्यन्तमृद्वी, मानस्यापि शैलस्तम्भादिसमानता तद्वतो नमनाभावविशेषाज्ज्ञेया, मानोऽप्यनन्तानुबन्ध्यादिरूपः क्रमेण दृश्यः, कृमिरागे वृद्धसम्प्रदायोऽयम्, यथा मनुष्यादीनां रुधिरं गृहीत्वा केनापि योगेन युक्तं भाजने स्थाप्यते ततस्तत्र कृमय उत्पद्यन्ते, ते च वाताभिलाषिणः छिद्रनिर्गता आसन्ना भ्रमन्तो निर्हारलाला मुञ्चन्ति ताः कृमिसूत्रं भण्यते तच्च स्वपरिणामरागरञ्जितमेव भवति, तत्र कृमीणां रागो रञ्जकरसः तेन रक्तं कृमिरागरक्तमेवं सर्वत्र, कर्दमो गोवाटादीनाम्, खञ्जनं दीपादीनाम्, हरिद्रा प्रतीतैव । कृमिरागादिरक्तवस्त्रसमानता च लोभस्यानन्तानुबन्ध्यादितद्भेदवतां जीवानां क्रमेण दृढहीनहीनतरहीनतमानुबन्धत्वात्, तथाहि कृमिरागरक्तं वस्त्रं दग्धमपि न रागानुबन्धं मुञ्चति तद्भस्मनोऽपि रक्तत्वात्, एवं यो मृतोऽपि लोभानुबन्धं न मुञ्चति तस्याभिधीयते लोभः कृमिरागरक्तवस्त्रसमानोऽनन्तानुबन्धी चेति, एवं सर्वत्र भावना कार्या ॥ ११० ॥

कर्मसाम्यादाह—

**प्रकृतिस्थित्यनुभावप्रदेशभेदो बन्धो बन्धनोदीरणोपक्रमणाविपरिणामनाभेद उपक्रमः प्रकृतिस्थित्यनुभावप्रदेशविषयमल्पबहुत्वं संक्रमनिधत्तनिकाचितान्यपि ॥ १११ ॥**

**प्रकृतीति,** सकषायजीवस्य कर्मयोग्यपुद्गलग्रहणं बन्धः, तत्र कर्मप्रकृतीनां ज्ञानावरणीयाद्यष्टभेदानामविशेषितस्य कर्मणो वा बन्धः प्रकृतिबन्धः । तासामेव जघन्यादिभेदेन स्थितेर्निर्वर्त्तनं स्थितिबन्धः, अनुभावो विपाकः, तीव्रादिभेदो रस इत्यर्थस्तस्य बन्धोऽनुभावबन्धः, जीवप्रदेशेषु कर्मप्रदेशानामनन्तानन्तानां प्रतिप्रकृति प्रतिनियतपरिणामानां बन्धः प्रदेशबन्धः परिमितपरिमाणगुडादिमोदकबन्धवदिति । एवञ्च मोदकदृष्टान्तं वर्णयन्ति वृद्धाः, यथा किल मोदको नागरादिद्रव्यबद्धः सन् कोऽपि

नलक्षणो विस्मृतप्रमेयवादिनः प्रमेयस्मारणादिलक्षणो वा प्रशास्तृदोषः । परिहरणमासेवा स्वदर्शनस्थित्या लोकरूढ्या वा अनासेव्यस्य, तदेव दोषः परिहरणदोषः, अथवा सभारूढ्या सेव्यस्य वस्तुनोऽनासेवनं परिहरणं तदेव तस्माद्वा दोषः, यद्वा वादिनोपन्यस्तस्य दूषणस्य सम्यक्परिहारो जात्युत्तरं परिहरणदोष इति, यथा बौद्धेनोक्तमनित्यः शब्दः कृतकत्वाद्घटवदिति, अत्र मीमांसकः परिहारमाह–ननु घटगतं कृतकत्वं शब्दस्यानित्यत्वसाधनायोपन्यस्यते शब्दगतं वा, आद्येऽसिद्धता, हेतोः शब्देऽभावात्, द्वितीये चानित्यत्वेन न तद्व्याप्तमुपलब्धमित्यसाधारणानैकान्तिको हेतुरिति, अयं न सम्यक् परिहारः, सर्वानुमानोच्छेदप्रसङ्गात्, अनुमानं हि साधनधर्ममात्रात् साध्यधर्ममात्रनिर्णयात्मकम्, अन्यथा धूमादनलानुमानमपि न सिद्ध्येत्, तथाहि अग्निरत्र धूमात्, यथा महानसे इति, अत्रापि विकल्प्यते किं पर्वतगतो धूमो हेतुरुत महानसगतः, आद्ये नाग्निना धूमस्य व्याप्तिः सिद्धेत्यसाधारणानैकान्तिको हेतुः, द्वितीयेऽसिद्धः पर्वते तस्यावृत्तेरिति, अयं परिहरणदोषः । लक्ष्यते तदन्यव्यपोहेनावधार्यते वस्त्वनेनेति लक्षणं स्वं च तल्लक्षणञ्च स्वलक्षणं यथा जीवस्योपयोगः, यथा वा प्रमाणस्य स्वपरावभासकज्ञानत्वम् । करोतीति कारणं–परोक्षार्थनिर्णयनिमित्तमुपपत्तिमात्रं यथा निरुपमसुखः सिद्धो अनाबाधज्ञानप्रकर्षात्, नात्र किल सकललोकप्रतीतः साध्यसाधनधर्मानुगतो दृष्टान्तोऽस्तीत्युपपत्तिमात्रता । दृष्टान्तसद्भावेऽस्यैव हेतुव्यपदेशः स्यात्, हिनोति गमयतीति हेतुः साध्यसद्भावभावतदभावतदभावाभावलक्षणः, अथवा स्वलक्षणकारणहेतुदोषाणामन्यथा व्याख्यानं कार्यं–यथा लक्षणदोषोऽसंभवोऽव्याप्तिरतिव्याप्तिर्वा, तत्र यस्यार्थस्य सन्निधानासन्निधानाभ्यां ज्ञानप्रतिभासभेदः तत्स्वलक्षणमिति स्वलक्षणस्य लक्षणं तदिन्द्रियप्रत्यक्षमेवाश्रित्य स्यान्न योगिज्ञानं तत्र हि न सन्निधानासन्निधानाभ्यां प्रतिभासभेदोऽस्तीत्यतस्तदपेक्षया न किञ्चित्स्वलक्षणं स्यादिति अव्याप्तेरुदाहरणम्, अतिव्याप्तिर्यथा–अर्थोपलब्धिहेतुः प्रमाणमिति प्रमाणलक्षणं, इह चार्थोपलब्धिहेतुभूतानां चक्षुर्दध्योदनभोजनादीनामानन्त्येन प्रमाणेयत्ता न स्यात्, यद्वा लक्ष्यतेऽनेनेति व्युत्पत्त्या दृष्टान्तो लक्षणं तद्दोषः साध्यविकलत्वादिः, नित्यः शब्दो मूर्त्तत्वात्, घटवदिति साध्यविकलत्वम् । कारणदोषः साध्यं प्रति तद्व्यभिचारः, यथाऽपौरुषेयो वेदो वेदकारणस्याश्रूयमाणत्वादिति, अश्रूयमाणत्वं हि कारणान्तरादपि सम्भवतीति । हेतुदोषोऽसिद्धविरुद्धानैकान्तिकत्वलक्षणः, तत्रासिद्धः, अनित्यः शब्दश्चाक्षुषत्वाद्घटवदिति, अत्र हि चाक्षुषत्वं शब्दे न सिद्धम्, विरुद्धो यथा नित्यश्शब्दः कृतकत्वाद्घटवदित्यत्र घटे कृतकत्वं नित्यत्वविरुद्धमनित्यत्वमेव साधयति, अनैकान्तिको यथा नित्यः शब्दः प्रमेयत्वादाकाशवदित्यत्र प्रमेयत्वमनित्येष्वपि वर्त्तते, ततः संशय एवेति । संक्रामणं प्रस्तुतप्रमेयेऽप्रस्तुतप्रमेयस्य प्रवेशनं प्रमेयान्तरगमनमित्यर्थः, अथवा प्रतिवादिमते आत्मनः संक्रामणं परमताभ्यनुज्ञानमित्यर्थः, तदेव दोष इति । निग्रहः-छलादिना पराजयस्थानं स एव दोष इति । वसतः साध्यधर्मसाधनधर्मावत्रेति वस्तुप्रकरणात् पक्षः, तस्य दोषः–प्रत्यक्षनिराकृतत्वादिः, यथाऽश्रावणः शब्दः, अत्र शब्देऽश्रावणत्वं प्रत्यक्षनिराकृतमिति ॥ २२९ ॥

एते दोषा अनुयोगगम्याः, अनुयोगश्च वचनतोऽर्थतश्च भवति, तत्र दानलक्षणार्थस्य भेदानामनुयोगमाह—

प्राणिगणबाधा न भवति, न वा मारिर्भवति, स्वकीयराजसैन्यं तदुपकारि न भवति, परचक्रमपि न भवति, अतिवृष्टरपि न भवति, अनावृष्टिरपि न भवति, दुर्भिक्षमपि न भवतीति अत्राद्याश्चत्वारोऽतिशया जन्मप्रभृतित एकोनविंशतिर्देवकृताः एकादश घातिकर्मणां क्षयाद्भवन्तीति ॥ ३१ ॥

तीर्थकृतां सातिशयवचनत्वाद्वचनातिशयानाचष्टे—

**संस्कारवदुदात्तोपचारोपेतगम्भीरशब्दादयो वचनातिशयाः ॥ ३२ ॥**

**संस्कारवदिति,** वचनं हि गुणवद्वक्तव्यं तद्यथा–संस्कारवत्त्वं-लक्षणयुक्तत्वम्, उदात्तत्वमुच्चैर्वृत्तिता, उपचारोपेतत्वं–अग्राम्यता, मेघस्येव गम्भीरशब्दम्, अनुनादित्वं–प्रतिरवोपेतता, दक्षिणत्वं–सरलता, उपनीतरागत्वं–मालकोशादिग्रामरागयुक्तता, एते सप्त शब्दापेक्षया अतिशयाः अन्ये त्वर्थापेक्षया । महार्थत्वं–बृहदभिधेयता, अव्याहतपौर्वापर्यं–पूर्वापरवाक्याविरोधः, शिष्टत्वं–अभिमतसिद्धान्तोक्तार्थता वक्तुः शिष्टतासूचकं वा, असन्दिग्धत्वं–असंशयकारित्वम्, अपहृतान्योत्तरत्वं–परदूषणाविषयता, हृदयग्राहित्वं–श्रोतृमनोहरता, देशकालाव्यतीतत्वं–प्रस्तावोचितता, तत्त्वानुरूपत्वं–विवक्षितवस्तुस्वरूपानुसारिता, अप्रकीर्णप्रसृतत्वं–सुसम्बन्धस्य सतः प्रसरणं अथवाऽसम्बन्धानधिकारित्वातिविस्तरयोरभावः, अन्योऽन्यप्रगृहीतत्वं–परस्परेण पदानां वाक्यानां वा सापेक्षता, अभिजातत्वं–वक्तुः प्रतिपाद्यस्य वा भूमिकानुसारिता, अतिस्निग्धमधुरत्वं–अमृतगुडादिवत्सुखकारित्वम्, अपरमर्मवेधित्वं–परमर्मानुद्घट्टनस्वरूपम्, अर्थधर्माभ्यासानपेतत्वं–अर्थधर्मप्रतिबद्धत्वम्–उदारत्वं–अभिधेयार्थस्यातुच्छत्वं गुम्फगुणविशेषो वा, परनिन्दात्मोत्कर्षविप्रयुक्तत्वमिति प्रतीतमेव, उपगतश्लाघत्वं–उक्तगुणयोगात् प्राप्तश्लाघता, अनपनीतत्वं–कारककालवचनलिङ्गादिव्यत्ययरूपवचनदोषापेतता, उत्पादिताच्छिन्नकौतूहलत्वं–स्वविषये श्रोतॄणां जनितमविच्छिन्नं कौतुकं येन तत्तथा, तद्भावस्तत्त्वम्, अद्भुतत्वं, अनतिविलम्बितत्वञ्च प्रतीतम्, विभ्रमविक्षेपकिलकिञ्चितादिविप्रमुक्तं–विभ्रमो–वक्तृमनसो भ्रान्तता, विक्षेपः–तस्यैवाभिधेयार्थं प्रत्यनासक्तता, किलकिञ्चितं–रोषभयाभिलाषादिभावानां युगपत्सकृद्वा करणं आदिशब्दान्मनोदोषान्तरपरिग्रहस्तैर्विमुक्तता । अनेकजातिसंश्रयाद्विचित्रत्वम्, इह जातयोवर्णनीयवस्तुस्वरूपवर्णनानि, आहितविशेषत्वं–वचनान्तरापेक्षया ढौकितविशेषता, साकारत्वं–विच्छिन्नवर्णपदवाक्यत्वेनाकारप्राप्तत्वम्, सत्त्वपरिगृहीतत्वं–साहसोपेतता, अपरिखेदित्वं–अनायाससम्भवः, अव्युच्छेदित्वं–विवक्षितार्थानां सम्यक् सिद्धिं यावदनवच्छिन्नवचनप्रमेयतेति पञ्चत्रिंशातिशयाः ॥ ३२ ॥

वाण्यतिशयवतां संपत्तिविशेषानाह—

**महावीरस्याऽऽर्याणां षट्त्रिंशत्सहस्राणि कुन्थोः सप्तत्रिंशद्गणा गणधराश्च पार्श्वस्याष्टत्रिंशदार्यिकासहस्राणि नमेरेकोनचत्वारिंशदाधोऽवधिकशतानि अरिष्टनेमेश्चत्वारिंशदार्यिकासहस्राणि नमेरेकचत्वारिंशदार्यिकासहस्राणि भवन्ति ॥ ३३ ॥**

**महावीरस्येति,** सुगमम्, महांश्चासौ वीरश्च कर्मविदारणसहिष्णुर्महावीरः, 'विदारयति

